योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६२

द्विषष्टितमः सर्गः ६२

श्रीवसिष्ठ उवाच ।

अत्र राघव वक्ष्येऽहमितिहासमिमं श्रृणु ।

यद्वृत्तं कस्यचिद्भिक्षोः किंचिन्मननशालिनः ।। १

आसीत्कश्चिन्महाभिक्षुः समाध्यभ्यासतत्परः ।

नित्यं स्वव्यवहारेण क्षपयत्यखिलं दिनम् ।। २

समाध्यभ्यासशुद्धं तत्तस्य चित्तं क्षणेन यत् ।

चिन्तयत्याशु तद्भावं गच्छत्यम्ब्विव वीचिताम् ।। ३

कदाचित्स समाधानविरतोऽतिष्ठदेकधीः ।

किंचित्संचिन्तयामास स्वासनस्थः क्रियाक्रमम् ।। ४

तस्य चिन्तयतो जाता प्रतिभेयमिति स्वतः ।

भावयाम्याशु लीलार्थं सामान्यजनवृत्तिताम् ।। ५

इति संचिन्त्य चेतोऽस्य स्थितं किंचिन्नरान्तरम् ।

स्पन्दसंस्थानसंत्यागमात्रेणावर्तनेऽम्ब्विव ।। ६

तेन चित्तनरेणाथ कृतं नामात्मवाञ्छया ।

जीवटोऽस्मीति सहसा काकतालीयवत्स्थितम् ।। ७

जीवटो विजहाराथ स स्वप्नपुरुषश्चिरम् ।

स्वप्ननिर्माणनगरे कस्मिंश्चित्पुरवीथिषु ।। ८

तत्र पानं पपौ मत्तो भृङ्गः पद्मरसं यथा ।

लीलयैव दृढं हृष्टः सुष्वाप घननिद्रया ।। ९

स्वप्ने ददर्श विप्रत्वं पाठानुष्ठानतुष्टिमत् ।

प्रतिभामात्रसंपन्नां चित्ते देशान्तराप्तिवत् ।। १०

कदाचित्स द्विजश्रेष्ठस्त्वहर्व्यापारनिष्ठया ।

सुष्वापान्तर्व्यवहृतिर्बीजतायामिव द्रुमः ।। ११

द्विजोऽपश्यत्स्वयं स्वप्ने सामन्तत्वमथात्मनि ।

स सामन्तः कृताहारः कदाचिद्घननिद्रया ।। १२

अपश्यद्राजतां स्वप्ने ककुब्वलयपालिनीम् ।

लालितां भोगपूगेन पुष्पौघेण लतामिव ।। १३

स कदाचिन्नृपः स्वस्थः सुष्वापास्तमितेहितः ।

पुरोभाविनिजाचारः स्वकार्यमिव कारणे ।। १४

अपश्यत्स्वात्मनि स्वप्ने सुरस्त्रीत्वमनिन्दितम् ।

वृक्षकोशरसोल्लासे मञ्जरीत्वमिवोदितम् ।। १३

सा सुरस्त्री रतिश्रान्ता निद्रां गाढामुपागता ।

मृगीत्वमात्मनि स्वैरमावर्तत्वमिवाम्बुता ।। १६

सा मृगी लोलनयना कदाचिन्निद्रया हृता ।

स्वप्ने ददर्श वल्लीत्वं स्वाभ्यासाद्दृढमात्मनि ।। १७

तिर्यञ्चोऽपि प्रपश्यन्ति स्वप्नं चित्तस्वभावतः ।

दृष्टानां च श्रुतानां च चेतःस्मरणमक्षतम् ।। १८

सा बभूव लतापुष्पफलपल्लवशालिनी ।

वनदेवी वनोद्यानलतागृहविलासिनी ।। १९

बीजान्तस्थाङ्कुराकाररूपयेहाधिरूढया ।

सापश्यदन्तःसंवित्त्या स्फुटं लवनमात्मनः ।। २०

कंचित्कालं सुषुप्तस्थं कलया जडतां घनाम् ।

अनुभूय ददर्शाथ स्वात्मानं भ्रमरं स्थिरम् ।। २१

षट्पदो विजहाराथ वने वनलतास्वसौ ।

पद्मिनीषु च फुल्लासु तरुणीष्विव वल्लभः ।। २२

प्रियाबिम्बाधरस्वादुरसवत्कौसुमं मधु ।

भ्रमत्कुसुमसंघासु मुक्तावल्लीविलासिषु ।। २३

स बभूव सरोजिन्यां व्यसनी विसनालगः ।

क्वचिदेव रतिं ह्येति चेतो जडमतेरपि ।। २४

तामाजगाम नलिनीं परिलोलयितुं गजः ।

रम्यवस्तुक्षयायैव मूढानां जृम्भते पदम् ।। २५

नलिनी मर्दिता सैव समं तेन स षट्पदः ।

गतो दन्तान्तरं व्रीहिरिव चूर्णत्वमाययौ ।। २६

भ्रमरो वारणालोकाद्वारणालोकभावनात् ।

ददर्शात्मानमामोदमत्तहस्तितयोदितम् ।। २७

शुष्कसागरगम्भीरे गजः खाते पपात ह ।

तमोघनघने शून्ये संसार इव जीवकः ।। २८

बभूव वल्लभो राज्ञो महापरबलान्तकः ।

सदा मदबलक्षीबो घूर्णोतीव निशाचरः ।। २९

कदाचिदसिनिस्त्रिंशच्छिन्नः सोऽस्तमुपाययौ ।

विवेकानिलनिर्लूनरूपो जीव इवात्मनि ।। ३०

पश्यन्गजघटाकुम्भस्थलाग्रोच्चलितानलीन् ।

गण्डस्थभ्रमराभ्यासाद्गजो भूयोऽप्यभूदलिः ।। ३१

सेवमानो वनलतां पुनरायात्स पद्मिनीम् ।

दुस्त्यजो हि दुरभ्यासो वासनानामबोधिनः ।। ३२

तत्र हस्तिखुराक्रान्तः पुनः संचूर्णतां ययौ ।

पार्श्वस्थहंससंवित्त्या बभूव कलहंसकः ।। ३३

कलहंसश्चिरतरं योनिष्वन्यासु संल्लुठन् ।

कदाचिद्बहुभिर्हंसैः संगतो विजहार ह ।। ३४

ब्राह्महंसात्मिका संवित्सशब्दार्थवती मनाक् ।

तत्र पुष्टास्य तस्यान्तः प्रागण्डरसबर्हिवत् ।। ३५

स तच्चिन्तां चरन्मृतो दृढं व्याधिघुणाहतः ।

तत्संवित्त्यनुसंधानाज्जातः पद्मजसारसः ।। ३६

तत्रातिसततविवेकवतो विलासैः

संबोधितो विगतलौकिकवस्तुदृष्टिः ।

मुक्तः स्थितो ननु युगान्तविधौ विदेह-

मुक्तेन तेन किमु भावि विभाव्यमेतत् ।। ३७

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० निर्वा० पू० जीवटोपाख्याने स्वप्नशतरुद्रीये भिक्षुसंसारोदाहरणं नाम द्विषष्टितमः सर्गः ।। ६२ ।।